नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**
No. of Printed Pages – **04**

# VU-87-Sahit.Shas. (Supp.)

## साहित्य – शास्त्रम्

### वरिष्ठ उपाध्याय पूरक परीक्षा, 2020

**समय : 3¼ होराः**

**पूर्णांक : 80**

परीक्षार्थिभ्यः सामान्यनिर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारित स्थाने नामांकः अनिवार्यतो लेखनीयः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

(5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

| | | |
|---|---|---|
| 1. | बिम्बप्रतिबिम्बभावः कस्मिन् अलंकारे भवति ? | 1 |
| 2. | तुल्ययोगितालंकारस्य लक्षणं लिखत । | 1 |
| 3. | स्वांकुरितव्यङ्ग्यं कतिविधम् ? | 1 |
| 4. | व्यञ्जनाशक्त्या कोऽर्थो अभिधीयते ? | 1 |
| 5. | 'प्रदीपं वर्धय' इत्यत्र का लक्षणा ? | 1 |
| 6. | चन्द्रालोके अभिधा कस्मिन् मयूखे वर्णितः ? | 1 |
| 7. | अद्रेः शृङ्गं कः हरति ? | 1 |
| 8. | कं नगरीं दृष्ट्वा सलिलनिधयः तोयमात्रावशेषाः संलक्ष्यन्ते ? | 1 |
| 9. | दशरथस्य ज्येष्ठः पुत्रः कः ? | 1 |
| 10. | कैकेयी पुत्रभरतस्य कृते किम् इच्छति ? | 1 |
| 11. | ललिता – वृत्तिं निरूपयत । | 2 |
| 12. | विभावः कति विधो भवति ? नामोल्लेखं कुरूत । | 2 |
| 13. | अस्फुट गुणीभूतव्यङ्ग्यं सोदाहरणं विवेचयत । | 2 |
| 14. | अभिधावृत्तेः स्वरूपं विवेचयत । | 2 |
| 15. | मेघं दृष्ट्वा यक्षः किं कृतवान् ? | 2 |
| 16. | शिप्रावातस्य वैशिष्ट्यं वर्णयत । | 2 |
| 17. | महाराज – दशरथस्य कति राज्ञ्यः आसन् ? नामानि लिखत । | 2 |
| 18. | "स्वः पुत्रः कुरुते पितुर्यदि वचः कस्तत्र भोः । विस्मयः" इति सूक्तेः सप्रसङ्गो भावार्थो लेखनीयः । | **1 + 1 = 2** |
| 19. | अधोलिखितालंकारयुग्मेषु कयोश्चिद् द्वयोः परस्परं भेदः प्रदर्शनीयः – | **2 + 2 = 4** |

(क) अप्रस्तुत प्रशंसा – व्याजस्तुतिः

(ख) वक्रोक्तिः – समासोक्तिः

(ग) दीपकम् – व्यतिरेकः

20. अधोलिखितेषु द्वयोरुदाहरणयोः अलंकारौ परिचीय तयोः लक्षणोल्लेखपूर्वकं संगतिर्विधेया – **2 + 2 = 4**

(क) 'हनूमानब्धिमतरद् दुष्करं किं महात्मनाम्' ।

(ख) 'कुटिलाः श्यामलाः दीर्घाः कटाक्षाः कुन्तलाश्च ते' ।

(ग) 'शत्रुं मित्रं द्विषत्पक्षं जयरञ्जय भञ्जय' ।

21. व्यञ्जना–स्वरूपं विवेचयत । **4**

22. लक्षणायाः प्रयोजकसम्बन्धान् वर्णयत । **4**

23. अगूढगुणीभूतव्यङ्ग्यं काक्वाक्षिप्तगुणीभूतव्यङ्ग्यञ्च सोदाहरणं विवेचयत । **4**

24. मेघदूतस्य वैशिष्ट्यं स्वशब्देषु प्रतिपादनीयम् । **4**

25. अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सप्रसङ्गो भावार्थो लेखनीयः – **1 + 3 = 4**

(क) धूमज्योतिः सलिलमरूतां सन्निपातः क्व मेघः,
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्याद परिगणयन् गुह्यकस्तं ययाचे,
कामाऽऽर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ।।

(ख) भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः,
पुण्यं यायास्त्रि भुवन गुरोर्धाम चण्डीश्वरस्य ।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या –
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरूद्भिः ।।

26. प्रतिमानाटकस्य चतुर्थाङ्कस्य कथासारो लेखनीय । **4**

27. अधोलिखितपद्ययोः कस्यचिदेकस्य छन्दः परिचीय तल्लक्षणं लेखनीयम् । लक्षणोदाहरणयोः संगतिश्च प्रदर्शनीया – **2 + 2 = 4**

(क) ताते धनुर्नमयि सत्यमवेक्षमाणे,
मुञ्चानि मातरि शरं स्वधनं हरन्त्याम् ।
दोषेषु बाह्यमनुजं भरतं हनानि
किं रोषणाय रूचिरं त्रिषु पातकेषु ।।

(ख) द्रुमा धावन्तीव द्रुतरथगतिक्षीणविषया
नदीवोद्‌ वृत्ताम्बुर्निपततिमही नेमिविवरे ।
अरव्यक्तिर्नष्टा स्थितमिव जवाच्चक्रवलयं,
रजश्चाश्वोद्धूतं पतति पुरतो नानुपतति ।।

28. करुणरसस्य स्वरूपं विविच्य तदुदाहरणमपि लेखनीयम् । **4 + 2 = 6**

**अथवा**

शान्तरसस्य स्वरूपं विविच्य तदुदाहरणमपि लेखनीयम् ।

29. अधोलिखितयोः पद्ययोः कस्यचिदेकस्य सन्दर्भ–प्रसङ्ग–अन्वयसहिता व्याख्या करणीया – **1 + 1 + 1 + 3 = 6**

(क) प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स प्रत्यग्रैः कुटजकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।

(ख) ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानि,
पुत्र प्रेम्णा कुवलयदलप्रापि कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं,
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः ।।

30. अधोलिखितपद्ययोः कस्यचिदेकस्य सन्दर्भ–अन्वयसहिता व्याख्या करणीया – **1 + 1 + 1 + 3 = 6**

(क) यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दया,
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते ।
अथ न रुचितं मुञ्च त्वं मामहं कृतनिश्चयो,
युवतिरहितं लोकं कर्त्तुं यतश्छलिता वयम् ।।

(ख) पितुर्नियोगदहमागतो वनं,
न वत्स दर्पान्न भयान्न विभ्रमात् ।
कुलं च नः सत्यधनं ब्रवीभि ते,
कथं भवान् नीचपथे प्रवर्तते ।।

---